# 0209

# (A)

Total No. of Questions—**16**

Total No. of Printed Pages—**4** **Regd. No.** | | | | | | | | | | |

**Part II**

# SANSKRIT, Paper - II

**(Second Language)**

***Time : 3 Hours]*** ***[Max. Marks : 100***

**Note :—**(1) *ALL* questions should be attempted.

(2) Question Nos. **1, 2** and **3** should be answered in the medium of instruction of the candidate.

(3) The remaining questions should be answered in Sanskrit (Devanagari Script) only.

(4) The bits of a question should be attempted together.

**सूचना :—** (1) **सर्वे** प्रश्ना: समाधेया: ।

(2-3) प्रथम, द्वितीय, तृतीय प्रश्नान् विहाय अन्ये प्रश्ना: संस्कृतभाषायामेव (देवनागरी लिप्या) समाधेया: ।

(4) अंशयुक्तस्य प्रश्नस्य अन्तर्गत अंशा: एकत्रैव समाधेया: ।

**1.** **एकस्य** श्लोकस्य प्रतिपदार्थं भावं च लिखत– 1×8=8

(अ) प्राणायामेन युक्तेन सर्वरोगक्षयो भवेत् ।
अयुक्ताभ्यास योगेन सर्वरोगस्य सम्भव: ॥

(आ) परप्राण परित्राणपर: कारुण्यवान् भवेत् ।
मांसं कपोतरक्षायै स्वं श्येनाय ददौ शिबि: ॥

**2.** **एकं** निबन्धप्रश्नं समाधत्त– 1×6=6

(अ) खड्गप्रदान कथां लिखत ।

(आ) हरिश्चन्द्र: सत्यमेव जयते इति कथं निरूपितवान् ?

**3.** **एकं** निबन्धप्रश्नं समाधत्त– 1×6=6

(अ) दधीचि: दानवीर: कथम् अभवत् ?

(आ) शुकशाबक: हारीतेन कथं रक्षित: ?

4. **त्रयाणां** प्रश्नानां समाधानानि लिखत– 3×2=6

(अ) राज्यं नाम कीदृशम् ?

(आ) किमर्थं गरुडेन देवलोकात् अमृतवृष्टिः पातिता ?

(इ) पार्वती तपः कथम् आचरति ?

(ई) वासुकिना गरुत्मान् किमिति अभिहितः ?

(उ) भरतः कीदृशं रामं द्रष्टुमैच्छत् ?

(ऊ) ऐरावताधिरूढः देवेन्द्रः किमर्थं प्रतीक्षते ?

5. **द्वयोः** ससन्दर्भं व्याख्यानं लिखत– 2×3=6

(अ) सगरस्यात्मजाः सर्वे मत्तः सलिलमाप्नुयुः ।

(आ) ध्रुवमूष्मणि दारुणो दवाग्निः ।

(इ) गृहकृत्याय निवृत्यतां लघु ।

(ई) ननु भोः मातुः शिशुं मा भिदः।

6. **द्वयोः** ससन्दर्भं व्याख्यानं लिखत– 2×3=6

(अ) यदि कौतूहलम् आकर्ण्यताम् ।

(आ) किमस्माकम् अमुना अभिवर्षेण ।

(इ) ईदृशस्य नृपस्य राज्ये जलपानमपि आधर्मः ।

(ई) कमपि प्रतिकारं कुरुष्व ।

7. **त्रयाणां** प्रश्नानां समाधानानि लिखत– 3×2=6

(अ) तपसि तिष्ठतः भगीरथस्य कति वर्षाणि अतीतानि ।

(आ) कानि यत्नतः गोप्यानि ?

(इ) नृपः किमिति निश्चयमागतः ?

(ई) कस्मात् युधिष्ठिरः नरक क्लेशं ददर्श ?

(उ) पाण्ड्यराजः खड्गं कथं प्राप्तवान् ?

(ऊ) भक्तः किमर्थं पुष्पवनम् अगच्छत् ?

8. **त्रयाणां** प्रश्नानां समाधानानि लिखत– 3×2=6

(अ) बाणभट्टेन विरचितं काव्यद्वयं किम् ?

(आ) एकस्मिन् दिने कृष्णः कान् ददर्श ?

(इ) सहस्रलोचनः वीरं किमवदत् ?

(ई) नरेन्द्रः श्रीरामकृष्णं किमिति अपृच्छत् ?

(उ) कः स्वर्गराज्यम् आक्रम्यत् ?

(ऊ) शिखिध्वजः कीदृशः ? सः राज्ये किमकरोत् ?

9. **एकेन** वाक्येन समाधानं दत्त– 5×1=5

(अ) भगीरथः कुत्र तपः आतिष्ठत् ?

(आ) शिशुपालस्य शिरः केन छिन्नम् ?

(इ) किं मृत्युः उच्यते ?

(ई) हरिश्चन्द्रस्य केन विस्मृतिः आगता ?

(उ) पुष्पविलापः संस्कृते केन अनूदितः?

10. **एकेन** वाक्येन समाधानं दत्त– 5×1=5

(अ) शुकः केन रक्षितः ?

(आ) उज्जयिन्याः राजा कः ?

(इ) पूर्णाहुतिकाले यज्ञकुण्डात् कः असुरः निर्गतः ?

(ई) नरेन्द्रः केन नाम्ना लोकविख्यातः अभवत् ?

(उ) वीरः राज्ञः कण्ठे कीदृशीं दिव्यमालां समर्पितवान् ?

11. अधोनिर्दिष्टकथां पठित्वा प्रश्नानां समाधानानि दत्त– 5×1=5

एकस्मिन् वने एकः अजशाबकः मात्रा सह स्वामिनः प्रियतमः सन् निवसति स्म । सः शाबकः मातरं त्यक्त्वा न गच्छतिस्म । अजस्वामी एकस्मिन् दिने अजसमूहं वनं चारणाय नीतवान् । तस्मिन् दिने शाबकः आनन्देन चरन् इतः ततः विचरति स्म । हठात् मेघावृतः आकाशः । सर्वत्र वने वारि आगतम् । अजस्वामी सर्वान् अजान् एकत्र आनीय अग्रे अचलत् । शाबकः मातुः च्युतः । स च मातरम् उद्दिश्य शब्दं कुर्वन् सर्वत्र अन्विष्टवान् । किन्तु सः मातरं न प्राप्तवान् । माता अपि शाबकाय शब्दं अकरोत् । किन्तु अजस्वामी अलक्ष्यं कृत्वा अजसमूहं अग्रे प्रसारितवान् । शाबकस्य मनः मातुः मेलनाय चिन्ताक्रान्तम् आसीत्। एकं जलाशयम् अपश्यत् । तत्र गत्वा जलं पिबन् आसीत् । अत्रान्तरे वृकः एकः आगत्य तं भक्षितवान् । वृकोऽपि सिंहेन भक्षितः ।

**प्रश्नाः–**

(अ) अजशाबकः कुत्र वसतिस्म ?

(आ) अजस्वामी चारणाय कं वनं नीतवान् ?

(इ) माता अपि शाबकाय किम् अकरोत् ।

(ई) शाबकं कः भक्षितवान् ?

(उ) वृकः केन भक्षितः ?

**12.** नामनिर्देशपूर्वकं **त्रीणि** सन्धत्त– 3×2=6

(अ) शरत् + चन्द्रः

(आ) रामस् + षष्टः

(इ) अच् + आदिः

(ई) ककुप् + नेता

(उ) रामः + करोति

(ऊ) प्रथमः + अध्यायः ।

**13.** नामनिर्देशपूर्वकं **त्रीणि** विघटयत– 3×2=6

(अ) गुरुर्जयति

(आ) षण्मुखः

(इ) षड्वारम्

(ई) मनश्चलति

(उ) तट्टीका

(ऊ) नमस्ते ।

**14.** **द्वौ** शब्दौ अन्तलिङ्गविभक्तिवचननिर्देशपूर्वकं सम्पूर्णतया लिखत– 2×6=12

(अ) स्रक्

(आ) एतद् (पुं.)

(इ) मरुत्

(ई) नामन् ।

**15.** समासनामनिर्देशपूर्वकं **त्रयाणां** विग्रहवाक्यानि लिखत– 3×2=6

(अ) प्रतिदिनम्

(आ) राजपुरुषः

(इ) हिमालयपर्वतः

(ई) महाबलः

(उ) पितरौ

(ऊ) त्रिभुवनम् ।

**16.** अधोरेखाङ्कितपदं शुद्धीकृत्य शुद्धं वाक्यं लिखत– 5×1=5

(अ) बालः गृहाणि अगच्छन् ।

(आ) सः विद्यालये अपठताम्

(इ) युवां जलं पास्यथ ।

(ई) एते भयेन धावति ।

(उ) वृक्षात् फलम् अपतन् ।